आधेयत्वं तादृशे सम्बन्धभेदे । यथा घटभूतलयोः ।

**आधि** पु० अधीयतेऽभिनिवेश्यते प्रतीकाराय मनोऽनेन आ+धा—कि । मानसदुःखकारके व्यथाभेदे "नाधयो व्याधयः क्लेशादैवभूतात्महेतवः" भा०प्र० । 'यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः" शकु० । आधिदैविकशब्देऽस्य विवृतिः । ईषत् अधिक्रियते उत्तमर्णोऽत्र आ+ईषदर्थे धा—अधिकारार्थे आधारे कि आधीयते ऋणशोधनार्थम् आ+धा-कर्मणि कि वा १ऋणशोधनार्थं प्रतिभूस्थानीयतया बन्धकत्वेन उत्तमर्णसमीपे अधमर्णेनाधीयमाने उत्तमर्णस्य ईषत्स्वत्वहेतुभूतव्यापारविशिष्टे २द्रव्येऽस्य विवृतिः मिता० । "धनप्रयोगे द्वौ विश्वासहेतू प्रतिभूराधिश्च । यथाह नारदः । "विश्रम्भहेतू द्वावत्र प्रतिभूराधिरेव चेति"। तत्र प्रतिभूर्निरूपित इदानीमाधिर्निरूप्यते । आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णाधिक्रियायै आधीयत इत्याधिः स च द्विधैव कृतकालोऽकृतकालश्च पुनश्चैकैकशो द्विविधः गोप्यो भोग्यश्च । यथाह नारदः।'अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः । कृतकालोऽपनेयश्च यावद्देयोद्यतस्तथा । स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव चेति" । कृतकाल आधानकाल एवामुष्मिन् काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं निरूपिते कालेऽपनेयः आत्मसमीपे नेतव्यो मोचयितव्यः इत्यर्थः । देयं दानं देयमनतिक्रम्य यावद्देयम् उद्यतो नियतः स्थापित इत्यर्थः । यावद्देयम् उद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः गोप्यो रक्षणीयः । एवञ्चतुर्विधस्याधेर्विशेषमाह । "आधिः प्रणश्येत् द्विगुणे धने यदि न मुच्यते । काले कालकृतो नश्येत् फलभोग्यो न नश्यति" या० । प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोच्यते तदा नश्यत्यधमर्णस्य धनं प्रयोक्तुः स्वं भवति। कालकृतः कृतकालः आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात्प्रागूर्द्धं वा । फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स न कदाचिदपि नश्यति । कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः 'काले कालकृतो नश्येदिति । अकृतकालस्य भोग्यस्य नाशाभाव उक्तः "फलभोग्यो न नश्यतीति' पारिशेष्यादाधिः प्रणश्येतदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते । द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षणं कर्त्तव्यम् वृहस्पतिवचनात् "हिरण्ये द्विगुणीभूते पूर्णे काले कृतावधौ । बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च । तदन्तरा धनन्दत्त्वा ऋणी बन्धमवाप्नुयादिति" । नन्वाधिःप्रणश्येदित्यनुपपन्नम् अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात् मनुवचनविरोधाच्च "नचाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः" इति । कालेन संरोधः कालसंरोधश्चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्न्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति न च विक्रयः एवमाधीकरणविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति, उच्यते आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः । आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुः प्रसिद्धः । तत्र धनद्वैगुण्ये निरूपितकालप्राप्तौ च द्रव्यदानस्यात्यन्तनिवृत्तेरनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिरुत्तमर्णस्य चात्यन्तिकं स्वत्वम्भवति । न च मनुवचनविरोधः यतः "नत्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयादिति" भोग्याधिं प्रस्तुत्येदमुच्यते "नचाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रय" इति भोग्यस्याधेश्चिरन्तनकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः स्वत्वन्नास्तीति । इहाप्युक्त "फलभोग्यो न नश्यतीति"। गोप्याधौ तु पृथगारब्धमनुना । "न भोक्तव्यो बलादाधिर्भुञ्जानो वृद्धिमुत्सृजेदिति" । इहापि वक्ष्यते "गोप्याधिभोगे नोवृद्धिरिति" आधिःप्रणश्येद्द्विगुण इति तु गोप्याधिं प्रत्युच्यत इति सर्वमविरुद्धम् । किञ्च "गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते । नष्टो देयो विनष्टश्च दैवराजकृतादृते" या० । गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति । अल्पेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् तथा सोपकारे उपकारकारिणि बलीवर्द्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति सम्बन्धः नष्टो विकृतिङ्गतस्ताम्रकटाहादिश्छिद्रभेदादिना पूर्ववत् कृत्वा देयः तत्र गोप्याधिर्न्नश्येत् पूर्ववत् कृत्वा देयः। उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या भोग्याधिर्यदि नष्टः तदा पूर्ववत् कृत्वा देयः। वृद्धिसद्भावे वृद्धिर्वा हातव्या विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण तद्दाने सवृद्धिकं मूल्यं लभते यदि न ददाति तदा मूलनाशः "विनष्टे मूलनाशः स्याद्दैवराजकृतादृते" इति नारदवचनात् । दैवराजकृतादृते दैवमग्न्युदकदेशोपप्लवादि ।